सम्पुटः - १, सञ्चिका - १, एप्रिल्, २०१४ ISSN: २३४८-११०२

# श्रुतिशोभा

## Journal of Samskrita and Samskriti





वेदविज्ञानशोधसंस्थानस्य

वार्षिकशोधपत्रिका

# पुराणेषु अष्टाङ्गयोगस्वरूपम्

डा॥ म. जयरामः

उपनिदेशकः। कृष्णमाचार्ययोगमन्दिरम्

**संक्षिप्तिका**

आर्षवाङ्मये चतुर्दशविद्यास्थानेषु पुराणानि परिगणितानि। वेदार्थवैचक्षण्यप्राप्तये पुरा समुद्भूतानां ग्रन्थानामेषां परिचयः नितान्तमपेक्षितः इति सम्प्रदायविदो वदन्ति। तथा च वचनम् -

**यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।**

**न चेत् पुराणं संविद्यात् नैव स स्याद्विचक्षणः॥[1] इति।**

पुरापि नवम् इत्यपि पुराणशब्दः व्युत्पाद्यते[2]। भारतदेशे जनानां जीवनेन सह अद्यावधि सम्बन्धवन्ति पुराणानि इत्यतः एतेषां नवत्वं परिरक्षितमिति भाति। हरिकथा-प्रवचनानि कर्मानुष्ठानानि स्तोत्रपठनानि इत्येते कलापाः अद्यापि पुराणप्रमाणाधारेणैव क्रियन्ते। पुरा लिखितानि चेदपि अधुनातनानामपि जनानां मार्गदर्शकानि पुराणानि। पुरुषार्थेषु चतुर्षु चरमस्य परमस्य च मोक्षस्य विवरणवेलायां पुराणानि तत्साधनत्वेन अष्टाङ्गयोगविचारं प्रस्तुवन्ति। महर्षिपतञ्जलिप्रणीतेषु योगसूत्रेषु अष्टावयवयुक्तः योगसाधनविचारः प्रस्तुतो वर्तते। यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिरूपाण्यष्टावङ्गानि। तानि चित्तस्य अशुद्धिक्षयापादनद्वारा ज्ञानोद्दीपकानीति पातञ्जलं[3] वचनम्। पुराणगतस्य अष्टाङ्गयोगस्य विचारः अत्र क्रियते।

**सारशब्दाः** - पतञ्जलिः, योगः, पुराणम्, अष्टाङ्गयोगः, षडङ्गानि ।

## पुराणेषु अष्टाङ्गयोगविचारौचित्यम् -

पतञ्जलिना स्वीये ग्रन्थे चित्तवृत्तिनिरोधलक्ष्यस्य प्राप्तिसाधनत्वेन अभ्यासवैराग्यक्रियायोगाः ग्रन्थस्य पूर्वभागे उल्लिखिताश्चेदपि पुनरपि अष्टाङ्गयोगरूपायाः साधनसरणेः प्रपञ्चः यः कृतः तस्य विवरणवेलायां विज्ञानभिक्षु-सदाशिवब्रह्मेन्द्रप्रभृतिभिः[4] व्याख्यातृभिः कथ्यते यत् अभ्यासवैराग्यरूपं योगसाधनं समाहितचित्तानाम् अलं भवति। व्युत्थितचित्तानां तु तपस्स्वाध्यायेश्वरप्रणिधानरूपावयवत्रयघटितः क्रियायोगः अपेक्षितः। किन्तु ततोऽपि व्युत्थितचित्तानां, लौकिकानां योगमार्गप्रवेशाय तत्र प्रगतिसाधनाय च अङ्गाष्टकसमुपेतः साधनमार्गः एव उचितः इति। साधकानाम् अत्यन्तासमाहितचित्तानामपि योगमार्गे आद्यसोपानायमानानि इमान्यष्टसंख्याकानि योगसाधनानि। अतः एव अत्यन्तमेव संसारसागरनिमग्नानामपि चित्ताराधकतया विरचितेषु पुराणेषु उल्लेखं स्थानं च अलभन्त इति भाति।

पुराणानि विशालानि। अष्टाङ्गयोगोऽपि विस्तृतः विचारः। पुराणगतस्य अष्टाङ्गयोगविचारस्य प्रबन्धेऽस्मिन् साकल्येन कथनं दुस्साध्यत्वेन भवति। अतः स्थालीपुलाकन्यायेन विचारप्रस्तावः क्रियते।

## पुराणेषु योगविचारः -

पुराणेषु संवादरूपेण विचाराः निरूप्यन्ते। योगशास्त्रीयाः विचाराः अपि सत्पुरुषाणां मध्ये विचारविनिमयरूपेण प्रस्तूयन्ते पुराणेषु पठितॄणां प्रस्तूयमानविचारे आदरोत्पादनाय। भागवते कपिलदेवहूत्योः, दत्तात्रेय-अलर्कयोः मार्कण्डेये, व्यासमुनिसमूहमध्ये ब्रह्मपुराणे, श्रीकृष्ण-उपमन्योः मध्ये शिवपुराणे, नारदसनकयोः संवादमुखेन नारदीये यौगिकाः विचाराः

कथिताः। पुराणेषु योगस्य अष्टाङ्गानां विवरणेन सह तत्सम्बद्धाः अन्येऽप्यंशाः प्रकटिताः सन्ति।

१) योगशब्दनिर्वचनम्

२) योगप्रभेदाः

३) योगानुष्ठानस्य देशकालौ

४) कामादयः योगदोषाः व्याध्यादयः योगान्तरयाः, उपसर्गभूताः सिद्धयः तज्जयोपायाः च

५) योगिनः आहरः

६) योगानुष्ठानप्रेरकवचनानि कथा च इत्यनेके अष्टाङ्गसहायभूताः विचाराः कथिताः। एतेषां मध्ये सुवर्णकिरीटस्योपरि रत्नमिव अष्टाङ्गयोगविचारः प्रस्तुतः पुराणेषु।

## अष्टाङ्गानि पुराणोक्तदिशा -

पतञ्जलिप्रणीतेषु योगसूत्रेषु पूर्वोल्लिखितासि यमाद्यष्टाङ्गानि कथितानि। किन्तु पुराणेषु योगाङ्गकथने न एकप्रकारता अस्ति। अनेकेषु पुराणेषु पातञ्जले अष्टाङ्गयोगे व्यत्ययः न कृतः। तथापि अष्टाङ्गयोगेन सह षडङ्गयोगस्यापि उल्लेखः केषुचन पुराणेषु विद्यते।

अ) शिवपुराणे अष्टानां षण्णां च अङ्गानाम् उल्लेखः एकस्मिन्नेव स्थाने विद्यते। तद्यथा -

**अष्टाङ्गो वा षडङ्गो वा सर्वयोगः समासतः ॥**

(७।३७।१४)

इत्युल्लिख्य षण्णामङ्गानाम् आवलिः तत्रैव प्रदत्ता -

**आसनं प्राणसंरोधः प्रत्याहारोऽथ धारणा।**
**ध्यानं समाधिर्योगस्य षडङ्गानि समासतः ॥**

(७।३७।१६) इति।

अत्र तावत् यमनियमौ परित्यक्तौ। स्कन्दपुराणेऽपि[५] अनेनैव प्रकारेण षडङ्गानि कथितानि, स्थानान्तरे[६] अष्टाङ्गान्यपि कथितानि।

आ) मार्कण्डेयपुराणे तावत् पातञ्जलानि योगाङ्गानि कथितानि चेदपि प्राणायामप्रत्याहारधारणाध्यानानि इत्येतेषां चतुर्णामेव प्राशस्त्यं प्रदीयते। तथा च दृश्यते -

**प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम्।**
**प्रत्याहारेण विषयान् ध्यानेनानीश्वरान् गुणान् ॥**

(३६।१०) इति।

इ) स्कन्दपुराणे[७] अन्यादृशानि षडङ्गान्यपि विद्यन्ते -

'काश्यां स्वदेहसंयोगः सम्यक् योग उदाहृतः' इति विचारम् उपस्थाप्य तत्रोपायः षडङ्गोपासनम् इति च सूच्यते। काशीयोगस्यास्य षडङ्गानि - भगवान् विश्वेश्वरः, भगवती विशालाक्षी, भगवती भागीरथी, श्रीकालभैरवः, ढुण्ढिराजः, दण्डपाणिश्च इत्येतानि दैवतानि। एतेषां नियमेनोपासनेन महायोगनिद्रामवाप्य काशीक्षेत्रस्थः साधकः अवश्यमेव मोक्षं लभते इति। एवमनेकधा पुराणेषु योगाङ्गनिरूपणं विद्यते। तथापि प्रबन्धेऽस्मिन् ते एव पुराणभागाः परामृष्टाः यत्र महर्षिणा पतञ्जलिना उक्तानि अष्टाङ्गानि चर्चितानि। अन्यथा विचारविस्तरस्य अन्तो न दृश्येत।

## यमः -

अष्टाङ्गेषु पतञ्जलिना यमाः प्रथमं कथिताः। अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः (योगसूत्रम् - २/३०) इति सूत्रितः महर्षिणा तेन। जातिदेशकालसमयानवच्छिन्नतया ते महाव्रतत्वेन अनुष्ठेयाः इति चापि सूत्रकारैः यमः साग्रहं प्रपञ्चितः[८]।

पुराणेषु यमस्य विवरणं बहुधा कृतमस्ति।

१) नारदीये पञ्चभिः अहिंसादिभिः सह अक्रोध-अनसूये[९] यमकोटौ प्रवेशिते।

२) 'नियमस्यापि वै मूलं यम एव न संशयः' (पूर्वभागः - ८/११) इत्यनया लिङ्गपुराणोक्त्या यमस्य प्रामुख्यं प्रकटितं वर्तते। निग्रहरूपेषु यमेषु दार्ढ्ये अनुत्पन्ने अनुष्ठानरूपाः नियमाः न फलन्ति इति विचारः साधकैरवधेयः इति भाति।

३) यमेषु अहिंसायाः परमत्वं कथयति अग्निपुराणम्। तथा च -

**यथा गजपदेऽन्यानि पदानि पथगामिनाम्।**
**एवं सर्वमहिंसायां धर्मार्थमभिधीयते ॥**

(३७१।४) इति।

हिंसायाः दशविधप्रभेदाः, ततो निवर्तनप्रकारः[१०] अपि अग्निपुराणे लभ्यते।

४) 'ब्रह्मचर्यपरित्यागात् ज्ञानवानपि पातकी' (पूर्वभागः - ३३/७६) इत्यादिभिः वचनैः यमाङ्गभूतस्य ब्रह्मचर्यस्य विशेषेण विवरणं नारदीये पुराणे उपलभ्यते। इति यमविचारः पुराणेषु।

## नियमः -

अष्टाङ्गेषु द्वितीयमङ्गं नियमः। 'शौचसन्तोषतपस्स्वाध्यायेश्वरप्रणिधानानि नियमाः' इति पातञ्जलं सूत्रम् (२/३/२) पूर्वोक्तानां यमानाम् उच्यमानानां नियमानाञ्च पालनवेलायां वितर्कबाधायां सत्यां प्रतिपक्षभावनमास्थेयम्[१०] इत्यपि एतदवसरे योगसूत्रकृता प्रपञ्चितम्। पुराणेषु अवलोक्यमानेषु नियमानां संख्या, तेषां नाम, स्वरूपञ्चापि पातञ्जलमतात् भिद्यते।

१) ईश्वरप्रणिधानमित्येतत् पुराणेषु हरिपूजनम्, ईश्वरपूजा, वासदेवार्चनम्, ब्रह्मणि मनःप्रवणमित्यनेकधा शब्दितमस्ति।

२) स्वाध्यायस्य स्थाने गरुडपुराणे[१२] शान्ति कथितास्ति। शिवमहापुराणे च स्वाध्यायस्थाने जपः[१३] वर्तते।

३) नारदपुराणे[१४] उक्तैः पञ्चभिः सह 'सन्ध्योपासनम्' अपि नियमकोटौ अन्तर्भावितम्।

४) लिङ्गपुराणे तावत् शौचतपस्स्वाध्यायान् त्रीन् विहाय सप्त नूतनाः नियमाः कथिताः। एतत्पुराणाधारेण च नियमानां संख्या दश। तथा च वचनम् -

**शौचमिज्यातपो दानं स्वाध्यायोपस्थनिग्रहः।**
**व्रतोपवासमौनं च स्नानं च नियमाः दश ॥**

(पूर्वभागः - ८।२९) इति।

यमादीनामिव उल्लिखितानामेतेषां प्रत्येकं नियमानां विषयेऽपि विस्तरशः विवरणं विद्यते। एतयोः यमनियमयोः स्फुटतया श्लोकार्धेन प्रयोजनं विष्णुपुराणे सङ्गृह्यते (एते यमास्सनियमाः) 'विशिष्टफलदाः काम्याः निष्कामानां च मुक्तिदाः' (६/७/३८) इति।

## आसनम् -

तृतीयमङ्गम् आसनं योगस्य, यच्च विश्वप्रसिद्धमिदानीम्। स्थिरसुखो यः शरीरविन्यासः तदेवासनम्, तस्य चानुष्ठाने प्रयत्नशैथिल्यम्, अनन्तसमापत्तिरिति उपायद्वयम्, तेन च शीतोष्णसुखदुःखादिद्वन्द्वानभिघातः इति पातञ्जलः आसनविचारसारः[१५]।

पुराणेषु सर्वेष्वपि आसनानि राजयोगपद्धत्यैव विवृतानि। तन्नाम, आसनानि अष्टसु सोपानेषु अन्यतमानि। हठयोगग्रन्थेष्विव आसनानां रोगनाशकत्वादिकं योगचिकित्साङ्गतया वैशिष्ट्यादिकं नोपलभ्यते अत्र। योगमार्गेऽग्रे सर्तुम् आसनमप्युपायान्तरम्। परन्तु आसनविवरणे तिरस्कारोऽपि नैव आश्रीयते। स्कन्दपुराणे[१६] यावन्त्यः जीवजातयः तावन्त्यासनानि सन्ति इति उच्यते। नारदीये 'त्रिंशत्संख्याकान्यासनानि मुनीन्द्रैः कथितानि वै' (११५) उच्यते।

शिवपुराणे तावत् -

**स्वस्तिकं पद्ममर्धेन्दुं वीरं योगं प्रसाधितम्।**
**पर्यङ्कं च यथेष्टं च प्रोक्तमासनमष्टधा ॥**

(७।३७।२०) इत्यष्टासनानि उक्तानि।

कौर्मे च 'आसनं स्वस्तिकं प्रोक्तं पद्ममर्धासनं तथा' (उत्तरभागः - ११/४३) इति त्रीण्येवासनानि उच्यन्ते चेदपि तेषां विन्यासक्रमः अपि कथ्यते तत्र।

अन्यत्र अग्निगरुडपुराणादिषु योगिना पद्मासनादि किञ्चन आसनम् आस्थेयमिति कथ्यते। साधनोत्तमम् आसनमिति[१७] कथयद्भिः पुराणैः आसनानां साधनत्वं, न तु साध्यत्वम् अङ्गीक्रियते।

## प्राणायामः -

अष्टाङ्गेषु चतुर्थः प्राणायामः। 'श्वासप्रश्वासयोः गतिविच्छेदः प्राणायामः' (२/४९) इत्यतः आरभ्य 'ततः क्षीयते प्रकाशावरणम्' (२/५२) इत्यन्तेन ग्रन्थभागेन चतुर्भिः सूत्रैः पतञ्जलिना महर्षिणा प्राणायामः सप्रभेदः, सानुष्ठानक्रमः, सप्रयोजनश्च प्रपञ्चितः।

योगसूत्रेष्वपि पुराणेष्वपि सविस्तरमुपलभ्यते प्राणायामविवरणम्। षडङ्गो वाष्टाङ्गो वा योगः तत्र प्राणायामस्य स्थानं तु विद्यत एव। पूर्वोक्तयोगसूत्रविचारैः सह पुराणेषु -

१) प्राणायामानाम् अधममध्यमोत्तमप्रभेदाः कथिताः। अधमादिभेदाः कियत्कालं प्राणः धार्यते इत्याधारेण क्रियते। कालनिर्णयः मात्रापरिमाणेन क्रियते। (१२ मात्रावधिकः अधमः, २४ मात्रावधिकः मध्यमः, ३६ मात्रावधिकः उत्तमः इति) मात्रायाश्च इयत्तानिर्णये पुराणवचनान्यपि प्रमाणत्वेन स्वीक्रियन्ते हठग्रन्थेषु।

शिवपुराणे च मात्रापरिमाणनिर्वचनं क्रियते, तदित्थम् -

जानुं प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम्।
अङ्गुलीस्फोटनं कुर्यात् सा मात्रेति प्रकीर्तिता॥

(७।३७।३१) इति।

२) सगर्भः अगर्भश्चेत्यपि प्राणायामप्रभेदः प्रदर्शितः। तत्रापि सगर्भः, तन्नाम जपध्यानाभ्यां सह क्रियमाणः प्राणायामः प्रशस्यते। तदुच्यते अग्निपुराणे -

जपध्यानं विना गर्भः सगर्भः तत्समन्वितः।
इन्द्रियाणां जयार्थाय सगर्भं धारयेत् परम् ॥

(३७२।१४) इति।

३) रेचकपूरककुम्भकसरणौ शून्यकः इति कश्चन प्राणायामप्रकारः प्रदर्शितः नारदीयपुराणे। तथा चोच्यते -

न गृह्णाति न त्यजति वायुमन्तर्बहिः स्थितम्।
विद्धि तच्छून्यकं नाम प्राणायामं यथास्थितम्॥

(पूर्वभागः - ३३।१२६)

विवरणावलोकनेन ज्ञायते यत् नामैव नूतनं विद्यते, किन्तु योगसूत्रोक्तः बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः यः प्राणायामः, स एवायं शून्यकः इति।

४) हठग्रन्थेष्विव पुराणेष्वपि प्राणायामप्रयोजनानि सविस्तरं कथितानि।

उदाहरणाय शिवमहापुराणगतः कश्चन श्लोकः -

बहुभोजनसामर्थ्यं चिरादुच्छ्वासनं तथा।
लघुत्वं शीघ्रगामित्वम् उत्साहः स्वरसौष्ठवम् ॥

(७।३७।४२) इत्यादि

५) प्राणायामतः विशिष्टाः सिद्धयः प्रादुर्भवन्ति इत्येतत् पुराणवचनैरेव ज्ञायते।

तदुच्यते लिङ्गपुराणे -

प्राणायामेन सिद्ध्यन्ति दिव्याः शान्त्यादयः क्रमात्।
शान्तिः प्रशान्तिः दीप्तिश्च प्रसादश्च तथा क्रमात् ॥

(पूर्वभागः ८।५७) इति॥

मार्कण्डेये इतो भिन्नाः चतस्रः सिद्धयः भवन्ति इति उच्यते -

श्रूयतां मुक्तिफलदं तस्यावस्थाचतुष्टयम्।
ध्वस्तिः प्राप्तिः तथा संवित् प्रसादश्च महीपते॥

(३६।२१) इति।

एताः सर्वाः अपि सिद्धयः विवृताः पुराणेषु किन्तु प्रसक्तं चेदपि विस्तरभिया नात्र तत्प्रपञ्चः क्रियते।

इत्थं च प्राणायामदृष्ट्या हठराजोभयविचाराः अपि विस्तरेण विवृताः इति करतलामलकवत् स्थितं पूर्वोक्तोद्धरणावलोकनेन।

## प्रत्याहारः -

पञ्चमम् अङ्गं प्रत्याहारः। स्वस्वविषयासम्प्रयोगपुरस्सरं चित्तस्वरूपानुकार इव यो इन्द्रियाणां व्यवहारः सः प्रत्याहारः, तेन प्रमाथिनामिन्द्रियाणां परमावश्यता भवतीति सूत्रितं[४] पतञ्जलिना।

यथा प्राणायामस्य तथा इन्द्रियनिग्रहरूपस्य प्रत्याहारस्य विषयेऽपि नैके विचाराः पुराणेषु सुन्दरैः बोधजनकैः शब्दैः प्रकटिताः।

१) विष्णुपुराणस्य श्लोकः योगसूत्रोक्तप्रत्याहारनिर्वचनस्य रमणीयैः पदबन्धैः श्लोकरूपतामापादयति। तथा च -

शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित्।
कुर्यात् चित्तानुकारीणि प्रत्याहारपरायणः॥

(६।६।४३) इति॥

अन्येष्वपि पुराणेषु प्रत्याहारनिर्वचनं विद्यते चेदपि तत्र इन्द्रियनिग्रहमात्रं कथ्यते। किन्तु इहोद्धृते विष्णुपुराणीये श्लोके एव तेषां चित्तानुकारिता योगसूत्रोक्तापि सङ्गृहीता वर्तते इति विशेषः।

२) अजितेन्द्रियत्वं दौर्बल्यहेतुरिति सुष्ठु जानद्भिः पुराणकृद्भिः तन्महत्त्वं भृशं प्रतिपाद्यते। तत्रोदाहरणं ब्रह्मपुराणवचनम्। तथा च -

जन्तोः पञ्चेन्द्रियस्यास्य यद्येकं छिन्नमिन्द्रियम्।
ततोऽस्य स्रवति प्रज्ञा गिरेः पादादिवोदकम्॥

(२३५।४९) इति॥

३) इन्द्रियनिग्रहाभावे प्रज्ञाहानिमुक्त्वा, तदभावे साधनमार्गे अग्रिमसोपानारोहणमपि दुश्शकमिति विस्पष्टं प्रतिपादयन्ति पुराणानि। तथा च नारदीये पठ्यते -

अनिर्जितेन्द्रियग्रामो यस्तु ध्यानपरो भवेत्।
मूढात्मानं च तं विद्यात् ध्यानं तस्य न सिद्ध्यति॥

(पूर्वभागः ३३।१३१) इति॥

इत्थं पौराणिकः प्रत्याहारविचारः निवेदितः।

धारणा -

एतावता योगस्य बहिरङ्गाणि पञ्च सूचितानि। अग्रे च धारणादीनि त्रीणि योगस्य अन्तरङ्गाणि प्रपञ्च्यन्ते यत्र च पुराणैः महान् आदरः प्रकटयते। चित्तस्य आभ्यन्तरे नाभिचक्रादिषु बाह्ये वा कस्मिंश्चित् शास्त्रोक्ते देशे बन्धः स्थिरीकरणं धारणेति योगसूत्राणां व्यासप्रणीतस्य तद्भाष्यस्य च समेत्यभिप्रायः[१९]।

१) धारणा नाम चित्तस्य स्थिरीकरणम् इत्यत्र वैमत्यं पुराणेषु न विद्यते चेदपि, कुत्र तावत् चित्तस्य बन्धः कर्तव्यः इत्यत्र नानाविचाराः पुराणेषु उपलभ्यन्ते। तथाहि -

अ) विष्णुपुराणे तावदुच्यते -

**यच्च मूर्तं हरे रूपं यादृक् चिन्त्यं नराधिप।**
**तच्छ्रूयतामनाधारा धारणा नोपपद्यते ॥**

(६।६।७९) इति।

हरेः रूपे चित्तस्य स्थिरीकरणमुच्यतेऽत्र।

आ) शिवपुराणे -

**धारणा नाम चित्तस्य स्थानबन्धः समासतः।**
**स्थानं च शिव एवैकः ......**

(७।३७।४८) इति कथ्यते।

इ) गरुडपुराणे तावत् धारणायोग्यानि स्थानानि दशधा भवन्तीति कथ्यते -

**कण्ठे मुखे नासिकाग्रे नेत्रे भ्रूमध्यमूर्धसु।**
**किञ्चित् तस्मात् परस्मिंश्च धारणा दशधा स्मृता ॥**

(पूर्वभागः - २२६।२२) इति।

मार्कण्डेयपुराणे, कूर्मपुराणेऽपि गरुडोक्तदिशा दश स्थानानि नोच्यन्ते चेदपि गरुडपुराणावल्यन्तर्गतानि कानिचन धारणायोग्यस्थानानि कथ्यन्ते।

२) धारणायाः प्रयोजनमुच्यते भागवते -

**प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् ।**

(३।२८।११) इति।

अस्य श्लोकभागस्य व्याख्यानावसरे श्रीधरीये व्याख्याने कथ्यते यत् -

'वायुना सह मनसः स्थिरीकरणं धारणा' इति। अनेन धारणावसरे प्राणनिरोधोऽपि मुख्यः इत्यंशः व्याख्यात्रा स्मारितः अवगन्तव्यः।

३) अग्निपुराणे धारणा ध्यानात् परमुच्यते। अग्निपुराणदृष्ट्यापि अनुष्ठानक्रमे पूर्वत्वेऽपि पाठक्रमः ध्यानात् परमुपलभ्यते धारणा। धारणा व्याधिनिवारणमार्गः इत्यपि कश्चन अपूर्वः विचारः प्रकटयते अत्रैव। तथा च वचनम् -

**यस्मिन् यस्मिन् भवेदङ्गे योगिनां व्याधिसम्भवः।**
**तत्तदङ्गं धिया व्याप्य धारयेत् तत्त्वधारणम् ॥**

(३७४।६) इति।

अपरोऽपि विस्मयावहः विचारः प्रकटयते तत्रैव -

**धारणाभ्यासयुक्तात्मा यदि प्राणैर्विमुच्यते।**
**कुलैकविंशमुत्तर्य स्वर्याति परमं पदम् ॥**

(३७४।६) इति॥

धारणाभ्यासात् कुलोद्धारः स्वर्गप्राप्तिश्च भवतीति पुराणवचनमिदम्। अग्रिमस्य प्रमुखाङ्गभूतस्य ध्यानस्य अव्यवहितपूर्ववर्तित्वात्, धारणां विना ध्यानस्य दुश्शकत्वात् च एवं प्रशंसा कृतास्तीति भाति।

ध्यानम् -

धारणया चित्ते स्थिरे जाते सति प्रत्ययैकतानता (३/२) ध्यानमित्याख्यातं पतञ्जलिना।

१) पुराणश्लोकैः शिवविष्ण्वादीनि दैवतान्येव ध्येयतया उच्यन्ते।

२) ध्यानशब्दतात्पर्यस्य पतञ्जलेः अभिमतेन सह समानत्वेऽपि विभिन्नैः पदैः ध्यानलक्षणं कथ्यते पुराणेषु, यानि च अनुष्ठातॄणां ध्यानलक्षणस्मरणानुकूलानि। तादृशानि कानिचित् पुराणवचनानि प्रदर्श्यन्ते-

शिवपुराणे उच्यते -

**ध्येयावस्थितचित्तस्य सदृशः प्रत्ययस्य यः।**
**प्रत्ययान्तरनिर्मुक्तः प्रवाहो ध्यानमुच्यते ॥**

(७।३७।५२) इति।

शिवपुराणे तावत् -

**तद्रूपप्रत्ययैकाग्र्यसन्ततिश्चान्यनिस्पृहा।**
**तद्ध्यानं प्रथमैरङ्गैः षड्भिः निष्पाद्यते नृप ॥**

(६।६।९१) इति।

नारदीये -

ध्यानं सद्भिर्निगदितं प्रत्ययस्यैकतानता।

(पूर्वभागः ३३।१३८) इति।

३) ध्यानेन श्रान्तिर्भवति चेत् किं करणीयमिति यदि कश्चन पृच्छेत्, उत्तरं वक्ति अग्निपुराणम् -

ध्यानाच्छ्रान्तो जपेन्मन्त्रं जपाच्छ्रान्तश्च चिन्तयेत्।
जपध्यानादियुक्तस्य विष्णुः शीघ्रं प्रसीदति॥

(३७३।३३) इति।

४) ध्यातृभिः सर्वैः अवधेयम् अंशचतुष्टयं बोधयन्ति पुराणानि। अग्निपुराणे (३७३/७), शिवपुराणे (७/३७/५७) चोच्यते -

ध्याता ध्यानं ध्येयं च यच्च ध्यानप्रयोजनम्।
एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत योगवित्॥ इति।

अस्य चतुष्टयस्य परिज्ञानाभावे तु किंकर्तव्यविमूढता जायेत एव इत्येतन्न दुरवगमम्। अयं पुराणोक्तः ध्यानविचारः समासेन।

## समाधिः -

चरममङ्गम् अष्टाङ्गेषु समाधिः भवति। ध्यानमेव समाधिः, किञ्च यदा ध्येयस्वरूपेणैव परिणतं सत् स्वरूपशून्यतासदृशीं स्थितिं चित्तमाप्नोति सा समाधिः भवति इति भगवतः पतञ्जलेः सूत्रस्थं[७] समाधिनिर्वचनम्।

१) यथा ध्यानस्योक्तम् इत्थमेव समाधिविषये विचारनावीन्यं नास्ति पुराणेषु। तथापि समाधिविषये पौराणिकं पदविन्याससौष्ठवं, तत्रत्यानि उपमानवचनानि च आस्वादनीयानि स्मरणीयानि च भवन्ति। समाधिविषयकाणि पौराणिकानि कानिचन वचनानि अधः सङ्गृह्यन्ते -

विष्णुपुराणे -

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्।
मनसा ध्याननिष्पाद्यं समाधिस्सोऽभिधीयते॥

(६।७।९२) इति।

नारदीये समाधेः सुषुप्तिनिर्वातदीपसाम्यमुच्यते, तद्यथा -

सुषुप्तिवत्परानन्दयुक्तोपरतेन्द्रियः।
निर्वातदीपवत्संस्थः समाधिरभिधीयते॥

(पूर्वभागः - ३३।१४३) इति।

शिवपुराणे -

यदर्थमात्रनिर्भासं स्तिमितो दधिवत् स्थितम्।
स्वरूपशून्यवद्भानं समाधिरभिधीयते॥

(७।३७।६२) इति।

अत्र समाधिस्थितेः दधिवत् स्तिमितत्त्वसाम्यकल्पनं सरसम्।

२) धारणा, ध्यानं, समाधिः इति एतत्साधत्रयम् एकत्र संयमः इत्युक्त्वा सिद्धीनां प्राप्तये यादृशी प्रक्रिया उपलभ्यते योगसूत्रेषु, तादृशी प्रक्रियापि न दृश्यते पुराणसाहित्ये।

३) पुनश्च समाधिविषये संप्रज्ञात-असंप्रज्ञातभेदेन, वितर्क-विचार-आनन्द-अस्मितादिभेदेन, सबीजनिर्बीजरूपेण च ये ये विचाराः योगसूत्रेषु कथिताः, न तादृशाः विचाराः उपलब्धाः पुराणावलोकनेन इत्थं च योगस्य यमाद्यष्टाङ्गानां पुराणेषु वर्णितानां सङ्क्षेपेण स्वरूपवर्णनं कृतम्।

## उपसंहारः -

अन्ते च ब्रह्मपुराणस्थः कश्चन श्लोकः उद्धर्तुमिष्यते यश्च तत्र पुराणे योगविचारनिरूपणावसाने विद्यते। स च -

अपि वर्णावकृष्टस्तु नारी वा धर्मकाङ्क्षिणी।
तावप्येतेन मार्गेण गच्छेतां परमां गतिम्॥

(२२६।६८) इति।

पुराणवचनेनानेन ज्ञायते यत् योगः सर्वलोकैः अपि अनुष्ठातुं शक्यः, अनुष्ठेयश्च निःश्रेयसमार्गः इति। 'कृण्वन्तो विश्वमार्यम्' इत्यादिर्या उदात्ता, उदारा च आर्षविचारधारा विद्यते सा अत्रापि पुराणेषु अनुस्यूता ज्ञेया। ईदृशानां सर्वहितविचाराणाम् आकरभूतानि पुराणानि सर्वैरपि श्रेयस्कामैः अनुसन्धेयानीति शम्।

## टिप्पणम् -

१) Introductions to the Purans, P.36

२) अमरकोषः - सुधाव्याख्या १/३/५

३) योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः (योगसूत्रम् -२/२८)

४) मन्दाधिकारिणां यमादीन्यपि योगसाधनानि वक्तव्यानि - विज्ञानभिक्षुः, व्युत्थितचित्तस्य क्रियायोगः अभिहितः। अधुना ततोऽपि व्युत्थितचित्तस्य सम्प्रज्ञातसाधनान्यष्टाङ्गानि - सदाशिवब्रह्मेन्द्रः।

५) काशीखण्डः - ४१/९२-९३

६) वैष्णवखण्डः - ३०/८-१०

७) ४/४१/१७६

८) योगसूत्रम् - २/३१

९) पूर्वभागः - ३३....७५

१०) ३७१/ ५-६

११) योगसूत्रम् - २/३३

१२) १/२२६/१३

१३) ७/३७/१९

१४) पूर्वभागः - ३३/८७

१५) योगसूत्रम् - २/४६-४८

१६) वैष्णवखण्डः - ४१/६०

१७) कौर्मे उत्तरभागः - ११/४३

१८) २/५५ - ५६

१९) ३/१

२०) ३/३

## ग्रन्थाधमर्ण्यम्


**प्राचीनग्रन्थाः -**

१) अमरकोषः श्रीरामानुजदीक्षितकृतया सुधाव्याख्यया सहितः, सम्पादकः - वासुदेवलक्ष्मणशास्त्री पणशीकरः, चैखम्बा संस्कृतप्रतिष्ठानम्, दिल्ली, २००२

२) पातञ्जलयोगदर्शनम्, पातञ्जलरहस्य-तत्त्ववैशारदी-योगवार्तिक-भास्वती-साङ्ख्यप्रवचन-व्याख्याभिः समुपेतम्, सम्पादकः - श्रीदामोदरः शास्त्री, चौखम्बासंस्कृतभवन, वाराणसी, २००७

३) योगसूत्रम्, षट्टीकोपेतम्, सम्पादकः - ढुण्ढिराजः शास्त्री, चैखम्बासंस्कृतसंस्थान, वाराणसी, २००९

४) शिव-मार्कण्डेय-स्कन्द-नारद-लिङ्ग-कूर्म-अग्नि-विष्णु-ब्रह्म-भागवत-गरुड-पुराणानाम् अन्तर्जालाकारः

5) http://is1.mum.edu/vedicreserve/puran.htm

6) The Hathayoga pradipika of Svatmarama, with the commentary of Brahmananda, K.Kunjunni Raja (General Editor), The Adyar Library and Research Institute, Chennai, 2000

**नवीनग्रन्थाः -**

७) त्रिपाठी, डा। श्रीकृष्णमणिः, पुराणेतिहासयोः साङ्ख्ययोगविमर्शः, सम्पूर्णानन्दविश्वविद्यालयः, वाराणासी, १९७९

8) Sastri, Pushpendra, Introductions to the Purana-s, Rashtriya Sanskrit Sansthan, New Delhi, 1995